दिनाङ्क :-29.11.2024
प्रातः - 06:55

प्रधानमन्त्रि - ओडिशायात्रा

प्रधानमन्त्री नरेन्द्रमोदी अद्यारभ्य ओडिशाराज्यस्य त्रिदिवसीययात्रां प्रति याति। यत्र असौ ओडिशायाः भुवनेश्वरे आरक्षि-महानिदेशकानां आरक्षि-महानिरीक्षकाणाञ्च अखिलभारतीय- सम्मेलने भागमपि भजिष्यति। ध्यातव्यमस्ति यत् ओडिशाराज्येन प्रथमवारं एतादृशं सम्मेलनं आयोज्यते यत्र समेषां राज्यानां केन्द्रशासित-प्रदेशानाञ्च आरक्षि-महानिदेशकाः केन्द्रीयारक्षितारक्षिबल-रॉ- गुप्तचरविभाग-इत्येतेषां प्रमुखाः सम्मिलिताः भविष्यन्ति। श्रीमोदिनं समेत्य केन्द्रीयगृहमन्त्री अमितशाहः राष्ट्रियसुरक्षा परामर्शदः अजीत डोभालः च सम्मेलनेऽस्मिन् भागं स्वीकुर्वन्ति । सम्मेलने आन्तरिक- आन्तर्जालिक- सुरक्षा – आतंकवाद- सदृशाः विषयाः चचायै प्रमुखाः बिन्दवः भविष्यन्ति इति सम्भाव्यते ।

राष्ट्रपतिः तमिलनाडुः

राष्ट्रपतिः द्रौपदीमुर्मुः अवदत् यत् सशस्त्रबलैः न केवलं भारतस्य राष्ट्रिय हितानां रक्षणम् आवश्यकम् अपितु नवीनेभ्यः समाह्वानेभ्यः सज्जं भवेदिति । तमिलनाडोः वेलिंग्टन इत्यत्र डिफेन्स-सर्विस-स्टाफ - इति महाविद्यालयस्य छात्राधिकारिणः सदस्यान् च सम्बोधयन्ती राष्ट्रपतिः उक्तवती यत् द्रुतगत्या परिवर्तमाने भू-राजनैतिक-परिदृश्ये वयं कामपि परिस्थितिं परिहर्तुं सुसज्जिताः भवेम इति। राष्ट्रपतिः बुधवासरात् तमिलनाडुराज्यस्य चतुर्दिवसीययात्रायां वर्तते। अद्य राष्ट्रपतिः उदगमण्डले नीलगिरिजनपदे राजभवने जनजातीय-महिलानां स्वयंसाहाय्य समूह-सदस्यैः जनजातीय - समुदाय - प्रमुखैः सदस्यैः च सह संवादं विधास्यति तदनु शनिवासरे तमिलनाडोः तिरुवरुर-नगरे केन्द्रीय-विश्वविद्यालयस्य दीक्षान्त-समारोहे भागं ग्रहीष्यति।

शाह-शिन्दे-मेलनम्

महाराष्ट्रस्य कार्यवाहकः मुख्यमन्त्री शिवसेनानेता च एकनाथ- शिन्देः भाजपेतिदलनेता देवेन्द्रफडणवीसः एनसीपी प्रमुखः अजितपवारः च ह्यः नवदिल्लयां केन्द्रीयगृहमन्त्रिणं अमितशाहं मिलित्वा राज्ये प्रशासनस्य निर्माणस्य विषये चर्चां कृतवन्तः। एतस्यां चर्चायां भाजपेति दलाध्यक्षः जगत्प्रकाशनड्डाः अपि उपस्थितः आसीत्। श्रीएकनाथ शिन्देः पूर्वमेव उक्तवान् यत् असौ राज्ये प्रशासननिर्माणकार्ये बाधां नैव उत्पादयिष्यति राज्यस्य च अस्य शीर्षपदस्य विषये भाजपेतिदलस्य केन्द्रीयनेतृत्वस्य निर्णायस्य अनुपालनं करिष्यति इति।

हेमन्त-शपथवचनं

झारखण्ड-मुक्ति-मोर्चा-दलस्य नेता हेमन्त-सोरेनः ह्यः चतुर्थवारं मुख्यमन्त्रिपदाय शपथवचनं स्वीकृतवान्। राज्यपालः सन्तोष-कुमार-गंगवारः रांचीनगरे आयोजिते शपथग्रहणसमारोहे हेमन्तसोरेनाय तस्य च मन्त्रिमण्डलाय शपथवचनं प्रदत्तवान्।

शपथग्रहण समारोहे हेमन्तसोरेनस्य इण्डि संयुत्याः नेतारः अपि उपस्थिताः आसन्। कांग्रेसदलाध्यक्षः मल्लिकार्जुन-खरगेः लोकसभायां विपक्षदलनेता राहुलगांधी पश्चिमबङ्गालस्य मुख्यमन्त्री ममताबनर्जी पञ्जाबप्रदेशस्य मुख्यमन्त्री भगवन्तमानसिंहः दिल्ल्याः पूर्व-मुख्यमन्त्री अरविन्दकेजरीवालः च प्रमुखरूपेण एतस्मिन् समारोहे उपस्थिताः अभवन्। अवधेयं वर्तते यत् सञ्जाते झारखण्ड विधानसभानिर्वाचने झारखण्ड-मुक्ति-मोर्चा-युतया इण्डिया-संयुत्या एकाशीति-विधानसभासनेषु षड्पञ्चाशत् आसनानि विजितानि।

राज्यसभा-जयशङ्करः

भारतं संयुक्त-राष्ट्र-सुरक्षा-परिषदः विस्तारार्थं संयुक्तराष्ट्रस्य सदस्य- राष्ट्राणां मध्ये समर्थनं निर्मातुम् अन्यैः परिष्कारोन्मुखैः राष्ट्रैः सह मिलित्वा कार्यं कुर्वदस्ति यतो हि नवदिल्ल्याः समीपे संयुक्तराष्ट्रस्य सुरक्षापरिषदः स्थायिसदस्यं भवितुं सर्वाणि प्रमाणानि सन्ति यानि समकालिकीं वैश्विक-सत्यतां प्रदर्शयन्ति इति। विदेशमन्त्री डॉ. एस. जयशङ्करः ह्यः राज्यसभायां एकस्मिन् लिखितोत्तरे एतां वार्तां कथितवान्। असौ अकथयत् यत् प्रशासनं विस्तृतायां

संयुक्तराष्ट्र-सुरक्षा-परिषदि स्थायिसदस्यतां प्राप्तुं सर्वोच्च प्राथमिकतां प्रददाति इति। असौ सबलं कथितवान् यत् भारतं द्विपक्षीय-बहुपक्षीय-स्तरयोः अथ च संयुक्तराष्ट्रसुरक्षा-परिषदः संशोधने प्रचल्यमानासु चर्चासु सम्मिलितमस्ति।

## हॉकी

ओमानदेशे पुरूषाणां कनिष्ठ-एशिया- चषक-हॉकीतिप्रतिस्पर्धायां भारतेन जापानदलं त्रीणि-द्वे इत्यङ्कान्तरालेन पराजितम्।